


**Tracking:**

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 21/06/2015 | Typing Started on | H K Srinivasa Rao |
| 2 | 13/07/2015 | Typing Ended on | H K Srinivasa Rao |
| 3 | | Ist Proof Reading & Correction | H K Srinivasa Rao & Ranganath Gangoor |

|| ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ ||

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO., 8095551774, 9901971176, Email : srkarc@gmail.com*

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

''ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ''

ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಅನುನಾಸಿಕದ ಸ್ಪಷ್ಟವಾದ ವೈವಿಧ್ಯತೆಯು, ಕನ್ನಡ ಭಾಷೆಯಲ್ಲಿಯೂ ಇರುವಾಗ, ಅದರ ಜ್ಞಾನದ ಗಂಧವೇ ಇಲ್ಲದವರಂತೆ, ಕನ್ನಡಿಗರು ಇದನ್ನು ಕಡೆಗಣಿಸಿರುವುದು ಏಕೋ ತಿಳಿಯದಾಗಿದೆ. ಸರಿಯಾದ ಉಚ್ಚಾರಣೆಗಾಗಿ, ಸರಿಯಾದ ಅನುಸ್ವಾರಗಳು ಅವಶ್ಯಕ. ಆದ್ದರಿಂದ, ಶ್ರಮವಹಿಸಿ, ಸರಿಯಾದ ಅನುನಾಸಿಕ, ಅನುಸ್ವಾರಗಳನ್ನು ಬಳಸಲಾಗಿದೆ. ಓದುಗರು ಇದನ್ನು ಗಮನಿಸಿ ಮನ್ನಿಸಬೇಕಾಗಿ ಪ್ರಾರ್ಥಿಸಲಾಗಿದೆ.

This is the first effort of mine in English translation. Mistakes noticed if any is on account of my ignorance, and any good things is just the outcome of Sri Vijayeendra theertha's blessings. Would be grateful to Vidhwans, if they can guide and suggest any improvements, in my humble effort to introduce the basics of such great works to craving devotees.

# ॥श्री विजयीन्द्रयतिकृत नारायणशद्वार्थनिर्वचनम्॥

दोषदूरं गुणोपेतं नरसिंहं श्रियःपतिम्।
दैत्यसूदनमत्युग्रं श्रये सङ्कल्पसिद्धये॥

नारायणेति सन्नाम्नः शताधिकनिरुक्तयः।
विजयीन्द्रेण तन्यन्ते हरिगुर्वोः प्रसत्तितः॥

Ascetic Vijayeendra, with the blessings of Sri Hari and esteemed Guru (Acharya Madhwa) derives more than 100 etimological interpretations of the distinguished word "Narayana".

ವಿಜಯೀಂದ್ರ ಯತಿಗಳು 'ನಾರಾಯಣ' ಎಂಬ ಶ್ರೇಷ್ಠವಾದ, ನೂರಕ್ಕೂ ಮಿಗಿಲಾದ ನಿರುಕ್ತಿಗಳನ್ನು ಹರಿ-ಗುರುಗಳ ಪ್ರಸಾದದಿಂದ ವಿಸ್ತರಿಸುವರು.

1. अराः =दोषाः, तद्विरुद्धा गुणाः =नाराः, तेषाम् अयनम्= आश्रयः, नारायणः।

Source of Attributes contrasting Blemish.

ದೋಷದೂರವಾದ ಗುಣಗಳಿಗೆ ಆಶ್ರಯನಾದವನು.

2. आरायणः न भवतीति वा नारायणः।

Seldom the source of Blemish, hence Narayana.

ದೋಷಾಶ್ರಯನು ಆಗುವುದಿಲ್ಲವೆಂದು ನಾರಾಯಣ.

3. 'रधि गतौ' (धातुसङ्ख्या-110) इत्यतः भावे ड प्रत्यये टिलोपे रः=क्षानम् तद्भावः = अरः। तद्भावः नारः= पूर्णज्ञानम्, 'द्वौ नञौ प्रकृतमर्थं सातिशयं गमयतः' इति न्यायात्। तस्याश्रय इति वा नारायणः।

Source for complete attributes.

ಪೂರ್ಣಜ್ಞಾನಕ್ಕೆ ಆಶ್ರಯನಾದವನು.

4.रमु क्रीडायामित्यतः भावे डप्रत्यये टिलोपे, रः=रमणं=सुखम्, तद्भावः अरः, तद्भावः नारः= पूर्णसुखम्। तस्याश्रय इति वा नारायणः।

Source for complete Joy.

ಪೂರ್ಣಸುಖಕ್ಕೆ ಆಶ್ರಯನಾದವನು.

5. पूर्ववत् रः= ज्ञानम्। तद्विरुद्धमज्ञानम्= अरः, तदाश्रयः न भवतीति वा=नारायणः।

Seldom ignorant.

ಅಜ್ಞಾನವಿಲ್ಲದವನು.

6. पूर्ववत् रः = सुखम्, तद्विरुद्धं दुःखं= अरः, तदाश्रयः न भवतीति वा= नारायणः

Devoid of Sorrow.

ದುಃಖರಹಿತನು.

7. 'रीङ् क्षये' इत्यतः भावे डप्रत्यये रः= नाशः, अरः=चतुर्विध सम्यङ्नाशः, तद्भावः= नारः, तदयनत्वाद्वा, अरायणः न भवतीति वा नारायणः, 'अनित्यत्वं देहहानिः' इति वचनात्।

'अनित्यत्वं देहहानिः दुःखप्राप्तिः अपूर्णता।
नाशश्चतुर्विधः प्रोक्तः तदभावो हरेः सदा॥
तदन्येषां तु सर्वेषां नाशाः केचित् भवन्ति हि।
गीताभाष्ये महावाराहवचम् (अ-2-17)

Void of 4 types of annihilation

ಚತುರ್ವಿಧ ನಾಶರಹಿತನು.

8. न विद्यते अरः दोषः ययोः तौ=नारौ। 'अय गतौ' इत्यतः भावे घञर्थे क विधानम् इति क प्रत्यये अयः=ज्ञानम्। गत्यर्थानां ज्ञानार्थत्वात्। 'णश्च निर्वृतिवाचकः' इति वचनात् णः=सुखम्। अयश्च णश्च=अयणौ। नारौ अयणौ यस्य स इति वा=नारायणः। ज्ञानस्य निर्दोषत्वं अयतार्थ शून्यत्वं इत्यादि। आनन्दस्य दुःखासम्भिन्नत्वं इत्यादि।

Abode for faultless wisdom and joy.

ನಿರ್ದುಷ್ಟವಾದ ಜ್ಞಾನಸುಖಗಳಿಗೆ ಆಶ್ರಯನು.

9. न विद्यते अरः दोषः ययोस्तौ=नारौ, अयः=गतिः, णः=बलम्, 'णकारो बलम्' इति श्रुतेः। नारौ अयणौ यस्यासौ इति वा नारायणः। गतिबलयोः निर्दोषत्वं क्वापि प्रतिबन्धशून्यत्वम्।

Abode of unhindered wisdom and robust strength.

ಪ್ರತಿಬಂಧಕವಿಲ್ಲದ ಜ್ಞಾನ ಬಲಗಳಿಗೆ ಆಶ್ರಯನು.

10. अराः= दोषाः एषां सन्तीति अराः= दोषिणः। अर्श आद्यजन्तोऽयम्। तैरयनः=ज्ञेयः=अरायणः। तादृशः न भवतीति वा= नारायणः। गत्यर्थादवतेः कर्मणि 'कृत्युल्युटो बहुलम्' ति (पा.सू.2-2-112) ल्युटप्रत्यये अवादेशः। ..'विज्ञेयो भक्तैरेव नचान्यथा' इति वचनात्।

One seldom comprehended by rogues.

ದುಷ್ಟರಿಂದ ತಿಳಿಯಲ್ಪಡದವನು.

11. उक्तरीत्या अराणां=दोषिणाम् अयनं मार्गः भजनरूपः=अरायणः। न विद्यते अरायणः यस्मिन् सः इति वा=नारायणः। 'मैवारुवण्य' इति वाचनात्।

One who is never served by rogues.

ದುಷ್ಟಜನರಿಂದ ಸೇವ್ಯನಲ್ಲದವನು.

12. आ=अत्यन्तं, अराणां=दोषिणां द्वेषिणाम्, आ=समीचीनौ स्वरूपभूतौ इति यावत्, अयणौ=ज्ञाननन्दौ=अरायणौ, न विद्येते अरायणौ यस्मात् सः इति वा नारायणः अत्यन्त द्वेषादिरूप दोषयुक्तानां ज्ञानन्दस्वरूपत्वं नास्तीति यावत्।

One who seldom changes the innate nature of ignorance and sorrow in rogues hating Him.

ಭಗವಂತನ ದ್ವೇಷಿಗಳಾದ ದುಷ್ಟರ ಅಜ್ಞಾನದುಃಖ ಸ್ವರೂಪವನ್ನು ಬದಲಾಯಿಸದವನು.

13. न विद्यन्ते अराः दोषाः यस्मात् तत्= नारम्= अपरोक्षज्ञानम्, तादृशमयनं ज्ञानं यस्मात् सः इति वा नारायणः। 'भिद्यते हृदयग्रन्थिः' इत्यादेः तद्ज्ञानस्य सकलदोषनिवर्तकत्वात्।

One who bestows the manifesting-wisdom, which demolishes all flaws.

ಸಕಲ ದೋಷನಿವರ್ತಕವಾದ ಅಪರೋಕ್ಷಜ್ಞಾನವನ್ನು ನೀಡುವವನು.

14. न विद्यते रः- नारः यस्मिन् मोक्षे सः=नरः, तत्साधनत्वेन तत्सम्बन्धि=नारम्। तादृशम् अयनं= ज्ञानं यस्य सः इति वा नारायणः, 'तमेवं विद्वान्' इति तद्ज्ञानस्य मोक्षसाधनत्वात्।

Narayana's wisdom is instrumental cause for salvation.

ನಾರಾಯಣನ ಜ್ಞಾನವು ಮೋಕ್ಷಸಾಧನವು.

15. वक्ष्यमाणरीत्या नाराः= ज्ञानिनः। तेषामायः = पुरुषार्थः=नारायः। तस्य ज्ञानं तत्साधनं ज्ञानं= यस्य सः इति वा नारायणः। ज्ञानिनां सकलपुरुषार्थसाधनज्ञानविषयः इति यावत्। 'पुरुषार्थः अतःशब्दादिति बादरायणः' इति सूत्रात्।

Lords wisdom yields all the aims-of-existence(purushartha) to wise.

ಭಗವಂತನ ಜ್ಞಾನವು ಜ್ಞಾನಿಗಳಿಗೆ ಸಕಲಪುರುಷಾರ್ಥಗಳನ್ನೂ ನೀಡುವುದು.

17. न विद्यन्ते अराः= दोषाः दुःखाज्ञानादयः यस्याः सा नारा, लक्ष्मीः, तस्याः (अयनं) आश्रयः इति वा= नारायणः।

Shelter for flawless Lakshmi

ದೋಷದೂರಳಾದ ಲಕ್ಷ್ಮಿಗೆ ಆಶ್ರಯನು

18. उक्तरीत्या नारा=लक्ष्मीः अयनम्= आश्रयः यस्य सः इति वा= नारायणः। तत्प्रेरकत्वेन तदन्तःस्थत्वात्, तस्याः एव मुख्याधिष्ठानत्वात् च।

One who manifests Himself specially to Brahma and others. Also a resident inciter of Lakshmi.

ಲಕ್ಷ್ಮಿಯ ಒಳಗಡೆ ಪ್ರೇರಕನಾಗಿ ಇರುವವನು. ಬ್ರಹ್ಮಾದಿ ಜ್ಞಾನಿಗಳಿಗೆ ಲಕ್ಷ್ಮಿಯಲ್ಲಿ ವಿಶೇಷವಾಗಿ ಗೋಚರಿಸುವವನು.

19. नाराः लक्ष्मीः, तस्याः आयः=पुरुषार्थः। 'आयस्तु फलमुद्दिष्टम्' इति वचनात्। णः=बलं यस्मात् सः नारायणः।

One who bestows 'Aims-of-Existence' and vigor to Mahalakshmi is Narayana

ಮಹಾಲಕ್ಷ್ಮಿಗೆ ಪುರುಷಾರ್ಥವನ್ನು ಹಾಗು ಬಲವನ್ನು ನೀಡುವವನು.

20.नाराः लक्ष्मीः, तस्याः अयनं=सन्मार्गः ईश्वराराधनरूपः यस्मात् सः इति वा नारायणः

Narayana is the one who shows noble path to Lakshmi too !

ಲಕ್ಷ್ಮಿಗೆ ಸನ್ಮಾರ್ಗವನ್ನು ತೋರುವವನು.

21.नाराः=लक्ष्मीः, तस्याः यं =मिश्रणम्, आलिङ्गनमिति यावत्। णः=चुम्बनं यस्मात् सः इति वा नारायणः। 'यु (धातु 1107) चुम्बने' इत्यतः भावे डः, उभयत्र टिलोपश्च॥

Narayana is the one who gives the ectasy of kiss and embrace to Lakshmi

ಲಕ್ಷ್ಮಿಗೆ ಆಲಿಂಗನ, ಚುಂಬನ ಸುಖಗಳನ್ನು ನೀಡುವವನು.

22. नारा=लक्ष्मीः। तस्याः आसमन्तात् सर्वदेशकालयोः यं संयोगं स्वसम्बन्धं नयतीति वा= नारायणः। तस्या आ=सर्वगः 'अकार सर्वगो भावः' इति वचनात्। सर्वदेशकालगः स्वयं तादृशेन स्वेन आसमन्तात् सर्वदेशकालयोः यं संयोगसम्बन्धं नयतीति वा=नारायणः। 'समना चासृत्युपक्रमात्' इति सूत्रात् तयोः सर्वदेशकालव्याप्तिमत्वात्॥

Narayana is the one who is omnipresent, eternal and bestows the corresponding ability to Lakshmi too.

ತಾನೂ ಸರ್ವದೇಶ-ಕಾಲವ್ಯಾಪ್ತನಾಗಿದ್ದು, ಲಕ್ಷ್ಮೀಗೂ ಸರ್ವದೇಶ-ಕಾಲವ್ಯಾಪ್ತಿಯನ್ನು ನೀಡುವವನು.

23. न विद्यते अरमणं येषामिति वा, न विद्यते अराः= दोषाः येषामिति वा, न विद्यन्ते अरः योग्यज्ञाननाशः येषामिति वा, नाराः मुक्ताः। त एवायनमाश्रयो यस्येति वा नारायणः।

Liberated Souls stimulated by resident Narayana become the sacred medium of worship.( One who has the liberated souls as abode)

ಪ್ರೇರಕನಾಗಿ ತಮ್ಮಲ್ಲಿ ಭಗವವಂತನನ್ನು ಹೊಂದಿರುವುದರಿಂದ, ಉಪಾಸನೆಗೆ ಶ್ರೇಷ್ಠ ಅಧಿಷ್ಠಾನವೂ ಆಗಿರುವುದರಿಂದ, ಮುಕ್ತರೇ ಆಶ್ರಯನಾಗಿ ಉಳ್ಳವನು ನಾರಾಯಣ.

24. नाराः मुक्ताः तेषामयनमिति वा= नारायणः। 'मुक्तानां परमागतिः' इति वचनात्।

Narayana is the abode for Liberated souls too.

ಮುಕ್ತರಿಗೂ ಆಶ್ರಯನು.

25.नाराः मुक्ताः, तेषामासमीचीनौ अयणौ=ज्ञानानन्दौ स्वरूपभूतज्ञानानन्दाविति यावत्, यस्मात् सः इति वा नारायणः।

Narayana is the One who manifests the innate-natural-wisdom and bliss to Liberated souls too.

ಮುಕ್ತರಿಗೂ ಸ್ವರೂಪಭೂತವಾದ ಜ್ಞಾನಾನಂದಗಳು ಆವಿರ್ಭಾವವಾಗುವಂತೆ ಮಾಡುವವನು.

26.नाराः मुक्ताः, तेषामायः=फलम्, णः=बलं च यस्मात् सः इति वा नारायणः।

One who bestow aims-of-existence and vigor even to Liberated souls.

ಮುಕ್ತರಿಗೆ ಪುರುಷಾರ್ಥವನ್ನು ಹಾಗೂ ಬಲವನ್ನು ನೀಡುವವನು.

27.नाराः तेषामयनं=सन्मार्गः ईश्वराराधनरूपः यस्मात् सः इति वा नारायणः।

Narayana is the One who paves the noble path to liberated souls too.

ಮುಕ್ತರನ್ನೂ ಭಗವದಾರಾಧನರೂಪವಾದ ಸನ್ಮಾರ್ಗದಲ್ಲಿ ನಡೆಸುವವನು.

28. नाराः=मुक्ता, तेषामयः= गति प्रवृत्यादिः णः=शुद्धिः अमुक्तकतृतादर्शनं वा यस्मात् सः इति वा= नारायणः। 'अय गतौ' इत्यतो भावे क-प्रत्ययः। 'णिजि शुद्धौ'(धातुसङ्ख-1098), 'णश अदर्शने' इत्यतो वा डः, टि लोपः।

One who is cause of motion and conduct in liberated souls and their sanctifier. He is one who makes the liberated souls invisible to transmigrants.

ಮುಕ್ತರ, ಗಮನ, ಪ್ರವೃತ್ತಿಗಳಿಗೆ ಕಾರಣನು. ಮುಕ್ತರಿಗೆ ಎಲ್ಲಾ ವಿಧವಾದ ಶುದ್ಧಿಯನ್ನು ನೀಡುವವನು, ಮುಕ್ತರನ್ನು ಅಮುಕ್ತರು ನೋಡದಂತೆ ಮಾಡುವವನು.

29. नरः शेषांशः, तत्र आविष्टत्वेन तत्सम्बन्धित्वात् नारो वायुः, तस्याश्रयः इति वा नारायणः।

Shelter for Vayu endowed in Nara, who is an offshoot of Shesha.

ಶೇಷಾಂಶನಾದ ನರನಲ್ಲಿ ಆವಿಷ್ಟನಾಗಿರುವ ವಾಯುವಿಗೆ ಆಶ್ರಯನು.

30. नारो वायुः, स एवायनं यस्य सः इति वा नारायणः। वायोः मुख्याधिष्ठानत्वात्, तत्प्रेरकत्वेन तदन्तस्थत्वाच्च।

ವಾಯುದೇವನಲ್ಲಿ ಪ್ರೇರಕನಾಗಿ ಭಗವಂತನು ಇರುವುದರಿಂದಲೂ, ಭಗವಂತನ ಉಪಾಸನೆಗೆ ರುದ್ರಾದಿದೇವತೆಗಳಿಗೆ ವಾಯುವೇ ಮುಖ್ಯ ಅಧಿಷ್ಠಾನನಾದ್ದರಿಂದಲೂ, ವಾಯುದೇವನು ಭಗವಂತನಿಗೆ ಆಶ್ರಯನಾಗಿದ್ದಾನೆ.

Vayu is the favourite and Primary habitat for Rudra and others. Narayan is one who incites such Vayu and has him as His abode.

31. नारो वायुः, तस्य अयणौ= ज्ञानानन्दौ यस्मात् सः इति वा नारायणः।

Bestower of wisdom and bliss to Vayu

ವಾಯುದೇವರಿಗೆ ಜ್ಞಾನಾನಂದಾದಿಗಳನ್ನು ನೀಡುವವನು.

32. नारो वायुः, तस्यायः पुरुषार्थः, णः=बलं, यस्मात् सः इति वा नारायणः।

ವಾಯುದೇವನಿಗೆ ಪುರುಷಾರ್ಥ ಹಾಗೂ ಬಲಗಳನ್ನು ಕರುಣಿಸುವವನು.

Bestower of “Aims-of-existence” and Vigor to Vayu.

33. नारो वायुः, तस्य आ आयनं ईश्वराराधनरूप सन्मार्गः यस्मात् सः, इति वा नारायणः।

ವಾಯುದೇವನಿಗೆ ಭಗವದಾರಾಧನಾ ರೂಪವಾದ ಸನ್ಮಾರ್ಗವನ್ನು ಅನುಗ್ರಹಿಸುವವನು.

Blesser of Noble path of Worship to Vayu.

34. नारो वायुः, तस्यायः=गतिः, णः=बन्धः संसारः यस्मात् सः इति वा नारायणः।

ವಾಯುದೇವರ ಪ್ರವೃತ್ತಿ ಹಾಗೂ ಸಂಸಾರ ಬನ್ಧನಕ್ಕೆ ಕಾರಣನು

One who activates, transmigrates and captivates Vayu.

35. नारो वायुः, तस्यायः शुभप्रापकादृष्टम्। ‘आयः शुभावहो विधिः’ इत्यभिधानात्। णः= शुद्धिः अच्छिन्नभक्तत्वरूप शुद्धत्वं यस्मात् सः इति वा नारायणः।

ವಾಯುದೇವರಿಗೆ ಶುಭಾವಹವಾದ ಅದೃಷ್ಟವನ್ನು ಹಾಗು ಅವಿಚ್ಛಿನ್ನಭಕ್ತಿಯನ್ನು ಅನುಗ್ರಹಿಸುವವನು.

Blesser of fortune and auspicious devotion to Vayu.

36. रः = शरीरम्। ‘रश्च कायेऽनिले’ इत्येकाक्षरवचनात्। न विद्यते रः= शरीरं यस्य सः=अरः=अशरीरो वायुः। ‘अशरीरो यथा वायुः सामान्यागम्यदेहतः’ इति वचनात्। तस्यायः ज्ञानं, तत्सम्बन्धी तत्प्रवाहः अयः, तस्य णः=अदर्शनं, लोप इति यावत्। ‘अदर्शनं लोपः (पा.सू.1-1-6-) इति सूत्रात्। न विद्यते अरायणः वायुवृत्तिज्ञानप्रवाहलोपः यस्मात् सः इति वा नारायणः॥

ವಾಯುದೇವನ ವೃತ್ತಿಜ್ಞಾನ ಪ್ರವಾಹಕ್ಕೆ ಲೋಪವಾಗದಂತೆ ನೋಡಿಕೊಳ್ಳುವನು.

One who presides the uninterrupted flow of Vayu’s wisdom in his “course-of-conduct”.

37. न विद्यन्ते अराः=दोषाः, येषान्ते=नाराः = वेदाः, तेषामयनः प्रतिपाद्यतया इति वा नारायणः॥

One who is propounded by un-maligned Vedas

ನಿರ್ದುಷ್ಟವಾದ ವೇದಗಳಿಂದ ಪ್ರತಿಪಾದ್ಯನು.

39. नरसूनुत्वात् नाराः आपः, ताः अयनम् आश्रयः यस्य सः इति वा नारायणः। प्रलयोदके वटपत्रशायीति वा। ‘आपो नारा इति प्रोक्ताः’ इति वचनात्।

ನೀರೇ ಆಶ್ರಯವಾಗಿ ಉಳ್ಳವನು.

One who has Water as his abode.

40. नाराः आपः, तेषामाश्रय इति वा नारायण।

ನೀರಿಗೆ ಆಶ್ರಯನು

One who is the abode of water

41. नाराः आपः, त एव अयनं आश्रयः यस्य सः, प्रेरकत्वेन तदन्तःस्थित इति वा नारायणः।

ನೀರಿನ ಒಳಗೆ ಪ್ರೇರಕನಾಗಿ ಇರುವುದರ ಮೂಲಕ ನೀರೇ ಆಶ್ರಯನಾಗಿ ಉಳ್ಳವನು.

Stimulator of Water thereby having water as his abode.

42. नरः शेषांशः, तदंशित्वेन तत्सम्बन्धित्वेन नाराः= शेषः, स एव अयनं यस्य सः इति वा नारायणः। शेषशायीति प्रसिद्धः।

ನಾರಾಯಣನು ಶೇಷಶಾಯಿಯು.

One who reclines on Shesha.

43. नारः= शेषः, तस्यायनमाश्रय इति वा नारायणः।

ನಾರಾಯಣನು ಶೇಷನಿಗೆ ಆಶ್ರಯನು.

One who is Abode for shesha

44. नारःशेषः, तस्य आश्रयः= शुभप्रापकादृष्टं, णः= बलं च यस्मात् सः इति वा=नारायणः॥

ಶೇಷದೇವನಿಗೆ ಶುಭಾವಹವಾದ ಅದೃಷ್ಟವನ್ನು ಹಾಗು ಬಲವನ್ನು ನೀಡುವವನು.

Blesser of Invisible luck and vigor to Shesha.

45.नाराः = शेषः, तस्य अयणौ = ज्ञानानन्दौ यस्मात् सः वा नारायणः॥

ಶೇಷದೇವನಿಗೆ ಜ್ಞಾನಾನಂದಾದಿಗಳನ್ನು ನೀಡುವವನು

One from whom Shesha gets his divine wisdom and bliss.

47. नारः=शेषः, तस्य आयः=गतिप्रवृत्तिरूपः, णः बन्धः=संसारः, यस्मात् सः इति वा नरायणः॥

ಶೇಷದೇವನ ಗಮನ, ಪ್ರವೃತ್ತಿ ಹಾಗೂ ಸಂಸಾರದ ಬಂಧನಕ್ಕೆ ಕಾರಣನು.

One who decides the approach, course-of-conduct and captivation of Shesha.

48. नरः शेषांशः, तत्पुत्रत्वात्, तत्सम्बन्धित्वात् नारः = अर्जुनः, तस्य अयनं युद्धादौ प्रवृत्तिकारणः ज्ञानकारणो वा=नारायणः। एतदुभयं च गीतायां प्रसिद्धम्।

ಅರ್ಜುನನಿಗೆ ಗೀತೋಪದೇಶದ ಮೂಲಕ ಅಜ್ಞಾನವನ್ನು ದೂರಮಾಡಿ, ಒಳ್ಳೆಯ ಜ್ಞಾನವನ್ನು ನೀಡಿ, ಅವನನ್ನು ಯುದ್ಧದಲ್ಲಿ ತೊಡಗಿಸಿದವನು.

One who dispelled the ignorance, infused the proper wisdom and indulged Arjuna into war, through Bhagavad-Gita.

49.नारः=अर्जुनः, स एव अयनं यस्य सः= प्रेरकत्वेन तदन्तःस्थः इति वा नारायणः॥

One who, resided in and stimulated Arjuna by making him as one's abode.

ಅರ್ಜುನನಿಗೆ ಪ್ರೇರಕನಾಗಿ ಅವನಲ್ಲಿ ಇರುತ್ತಾ ಅರ್ಜುನನ್ನೇ ತನಗೆ ಆಶ್ರಯನಾಗಿ ಮಾಡಿಕೊಂಡವನು.

50. नारः अर्जुनः, तस्य आश्रयः इति वा नारायणः

ಅರ್ಜುನನಿಗೆ ಆಶ್ರಯನಾದವನು.

One who became abode for Arjuna.

51. नारः= अर्जुनः, तस्य अयणौ ज्ञानानन्दौ यस्मात् सः= इति वा नारायणः।

ಅರ್ಜುನನಿಗೆ ಜ್ಞಾನಾನಂದಗಳನ್ನು ನೀಡುವವನು.

One who bestows wisdom and bliss to Arjuna.

52. नारः= अर्जुनः, तस्य अयः=शुभप्रापकादृष्टम्, णः=बलं च यस्मात् सः इति वा नारायणः।

Bestower of good-luck and vigour to Arjuna.

ಅರ್ಜುನನಿಗೆ ಶುಭವಾಹಕವಾದ ಅದೃಷ್ಟವನ್ನು ಹಾಗೂ ಬಲವನ್ನು ಅನುಗ್ರಹಿಸುವವನು.

53. नारः= अर्जुनः, तस्य अयनम्= ईश्वराराधनरूपसन्मार्गः यस्मात् सः इति वा नारायणः॥

Launcher of Arjuna in the noble path of devotion.

ಭಗವಂತನ ಆರಾಧನಾರೂಪವಾದ ಸನ್ಮಾರ್ಗದಲ್ಲಿ ಅರ್ಜುನನ್ನು ತೊಡಗಿಸಿದವನು.

54. नारः= अर्जुनः, तस्य अयः = गतिः प्रवृत्त्यादिरूपः, णः=बन्धः संसारः, यस्मात् सः इति वा नारायणः।

One who decides the approach, course-of-conduct and captivation of Arjuna.

ಅರ್ಜುನನ ಗಮನ ಪ್ರವೃತ್ತಿಗಳಿಗೆ ಹಾಗೂ ಸಂಸಾರ-ಬಂಧನಕ್ಕೆ ಕಾರಣನು.

55. रः= नाशः, अरः= तदभावः, न विद्यते अरः=नाशाभावः, येषां ते नाराः। स्वरूपतः एव नाशवन्तः। 'द्वौ नञौ'इति न्यायात्। तेषां अयनः= विनाशिसमस्तपदार्थाश्रयः इति वा नारायणः॥

Abode for entire perishables.

ನಾಶ ಹೊಂದುವ ಸಮಸ್ತಪದಾರ್ಥಗಳಿಗೂ ಆಶ್ರಯನು

56. नाराः=अनित्याः, ते एव अयनं यस्य सः = प्रेरकत्वेन तदन्तःस्थः इति वा नारायणः। 'तत् सृष्ट्वा, तदेवानुप्राविशत' इति श्रुतेः।

One who has transcient objects as his abode, being its stimulator.

ಅನಿತ್ಯಪದಾರ್ಥಗಳಲ್ಲಿ ಪ್ರೇರಕನಾಗಿದ್ದು, ಅವುಗಳನ್ನೇ ಆಶ್ರಯಮಾಡಿಕೊಂಡವನು.

57. न विद्यते आरः = सम्यङ्नाशः=स्वरूपतः एव नाशः येषां ते नाराः= नित्याः, तेषामयनं समस्तनित्यपदार्थाश्रय इति वा नारायणः।

One who is abode for eternal objects.

ನಿತ್ಯ ಪದಾರ್ಥಗಳಿಗೆ ಆಶ್ರಯನು

58. नाराः=नित्याः, स एवायनं यस्य सः प्रेरकत्वेन तदन्तःस्थः इति वा नारायणः। 'नित्यं नित्यात्मना यतः' इत्यादेः।

Stimulator of eternal objects by making them His abode.

ನಿತ್ಯಪದಾರ್ಥಗಳಲ್ಲಿ ಪ್ರೇರಕನಾಗಿರುತ್ತಾ, ನಿತ್ಯಪದಾರ್ಥಗಳನ್ನೇ ಆಶ್ರಯವನ್ನಾಗಿ ಮಾಡಿಕೊಂಡವನು.

59.रः=ज्ञानं, अरः= ज्ञानात्यन्ताभावः, न विद्यते अरः येषां ते नाराः=चेतनाः, तेषामयनं इति वा नारायणः।

Abode for sentient Souls.

ಚೇತನರಿಗೆ ಆಶ್ರಯನು

60. नारः चेतनाः, ते एवायनं यस्य इति वा= नारायणः। 'चेतनश्चेतनानां' इत्यादेः। प्रेरकत्वेन तदन्तःस्थ इति यावत्॥

Urger in sentient souls by making them His abode.

ಚೇತನರಲ್ಲಿ ಪ್ರೇರಕನಾಗಿರುತ್ತಾ, ಅವರನ್ನೇ ಆಶ್ರಯರನ್ನಾಗಿ ಮಾಡಿಕೊಂಡವನು.

61. 'ऋ गतौ' इति धातोः भावे घञ् प्रत्यये, ऋकारस्य वृद्धौ अरपरत्वे, अर=ज्ञानम्, न विद्यते आरं येषां ते = नाराः=अचेतनाः', तेषामयन इति वा नारायणः॥

ಅಚೇತನಪದಾರ್ಥಗಳಿಗೆ ಆಶ್ರಯನು.

Abode for insentient objects

62. नाराः= अचेतनाः, त एवायनं यस्य, प्रेरकत्वेन तदन्तःस्थ इति वा =नारायणः।॥

ಮನುಷ್ಯರ ಜ್ಞಾನದೊಳಗೆ ಪ್ರೇರಕನಾಗಿರುತ್ತಾ ಆ ಜ್ಞಾನವನ್ನೇ ತನಗೆ ಆಶ್ರಯವನ್ನಾಗಿ ಮಾಡಿಕೊಂಡವನು.

Stimulator of wisdom and cognizance in sentients and the one who makes them His abode.

63.नरसम्बन्धित्वात्, न रीयते अनेन इति, न भेदः= अपायः येन इति वा निर्दोषवेदोत्पन्नत्वाद्वा नारं=ज्ञानं, तद्वन्तः नाराः=ज्ञानिनः अर्श आद्यजन्तोऽयं नाराः=स्त ज्ञानिनः,तद्वाचकात् गोत्रापत्ये, 'नडादिभ्यः फक्' इति फक् प्रत्यये, घस्य आयन आदेशे, ज्ञानिगोत्रत्पन्नः इत वा नारायणः। 'यस्तद्वेद स पितुः पितासत्' इत्यादेः॥

ಜ್ಞಾನಿಗಳಿಗೆ ಶುಭಾವಹವಾದ ಅದೃಷ್ಟವನ್ನು ಹಾಗೂ ಬಲವನ್ನು ನೀಡುವವನು।

Bestower of noble, invisible attributes and vigour to Sentient beings.

64. नाराः = मनुष्याः, अयनं यस्य प्रेरकत्वेन तदन्तःस्थः नरायणः, स एव नारायण इति वा॥

ಮನುಷ್ಯರಲ್ಲಿ ಪ್ರೇರಕನಾಗಿ ಇರುವುದರಿಂದ, ಆ ಮನುಷ್ಯರನ್ನೇ ಆಶ್ರಯರನ್ನಾಗಿ ಮಾಡಿಕೊಂಡವನು.

One who make human beings His abode being their stimulator.

65.नराणां मनुष्याणां सम्बन्धि तदुपकारभूतत्वेन विद्यमानं शरीरेन्द्रियं तद्विषयादिरूपं वस्तुजातं= नारं, तस्यायनः तत्सत्तादिप्रदः इति वा= नारायणः॥

ಶರೀರ -ಇಂದ್ರಿಯಗಳು ಹಾಗು ವಿಷಯಪದಾರ್ಥಗಳಿಗೆ ಅಸ್ತಿತ್ವವನ್ನು ನೀಡುವವನು.

One who gives existence to body, sensory-organs and Material objects.

66. उक्तरूपं नारमयनं यस्य सः प्रेरकत्वेन तदन्तःस्थ इति वा =नारायणः॥

ನರರಿಗೆ ಉಪಕಾರಕಗಳಾದ ಶರೀರ ಇಂದ್ರಿಯಗಳ-ವಿಷಯಪದಾರ್ಥಗಳು ಮೊದಲಾದುವುಗಳಲ್ಲಿ ಪ್ರೇರಕನಾಗಿರುತ್ತಾ ಅವುಗಳನ್ನು ತನಗೆ ಆಶ್ರಯವನ್ನಾಗಿ ಮಾಡಿಕೊಂಡವನು.

Stimulator of beneficial body, sensory organs and material objects consequently making them His abode.

67. नरसम्बन्धि, तत्प्रेरकत्वेन विद्यमानं देवजातं नारं, तदेव अयनं यस्य सः प्रेरकत्वेन तदन्तः स्थ इति वा =ननारायणः॥

ಮನುಷ್ಯರಿಗೆ ಪ್ರೇರಕರಾಗಿರುವ ತತ್ವಾಭಿಮಾನಿದೇವತೆಗಳ ಒಳಗಿದ್ದು ಪ್ರೇರಿಸುವವನು, ಆದ್ದರಿಂದ ಆ ದೇವತೆಗಳನ್ನು ತನಗೆ ಆಶ್ರಯರನ್ನಾಗಿ ಮಾಡಿಕೊಂಡವನು.

One who stimulates the stimulating deities of principle elements, thereby making them his abode.

68. उक्तरीत्या नारं= देवजातं, तस्याश्रय इति वा = नारायणः

ದೇವತಾಸಮೂಹಕ್ಕೆ ಆಶ್ರಯನು.

Abode for divine flock.

69. नरसम्बन्धित्वात् नारं= ज्ञानं, विषयतया तदाश्रय इति वा = नारायणः

ಮನುಷ್ಯರ ಜ್ಞಾನಕ್ಕೆ ಗೋಚರನಾಗುವವನು.

One who is perceptible to the experience of Human beings.

70. नारं ज्ञानं, तदेवायनं यस्य सः, प्रेरकत्वेन तदन्तः स्थ इति वा = नारायणः॥

ಮನುಷ್ಯರ ಜ್ಞಾನದೊಳಗೆ ಪ್ರೇರಕನಾಗಿರುತ್ತ, ಆ ಜ್ಞಾನವನ್ನೇ ತನಗೆ ಆಶ್ರಯವನ್ನಾಗಿ ಮಾಡಿಕೊಂಡವನು.

By making the human wisdom his abode, He stimulates it.

71आयः ज्ञानं, णः =सुखं, अयणौ, नारौ मनुष्यसम्बन्धिनौ, अयणौ यस्मात् सः इति वा नारायणः॥

ಮನುಷ್ಯರಿಗೆ ಜ್ಞಾನಸುಖಗಳನ್ನು ನೀಡುವವನು.

Bestower of wisdom and pleasure to human beings.

72. अयः=पुरुषार्थः, णः=बलम्, नारौ= मनुष्यसम्बन्धिनौ अयणौ यस्मात् सः इति = नारायणः॥

ಮನುಷ್ಯರಿಗೆ ಪುರುಷಾರ್ಥ, ಬಲಗಳನ್ನು ನೀಡುವವನು.

Bestower of 'Aims-of-life', and vigor.

73. नरसम्बन्धित्वात्, नरीयते अनेन इति, न भेदः= अपायः येन इति वा निर्दोषवेदोत्पन्नत्वाद्वा नारं=ज्ञानं, तद्वन्तः नाराः= ज्ञानिनः, अर्श आद्यजन्तोऽयं नाराः= सत् ज्ञानिनः तद्वाचकात् गोत्रापत्ये, 'नडादिभ्यः फक्' इति फक् प्रत्यये, फस्य आयन आदेशे, ज्ञानिगोत्रत्वन्नः इति वा नारायणः। 'यस्तद्वेद स पितुः पितासत्' इत्यादेः॥

ಭಕ್ತರ ಜ್ಞಾನಕ್ಕೆ ಗೋಚರನಾಗುತ್ತಾ ಭಕ್ತರ ಮಗನಾಗುವವನು।

One who becomes perceptible to Wisdom of devotees, consequently becoming a son to them.

74. नाराणां=ज्ञानिनाम्, अयणौ=ज्ञानान्दौ, यस्मात् सः इति वा = नारायणः॥

ಜ್ಞಾನಿಗಳಿಗೆ ಜ್ಞಾನಾನಂದದಾಯಕನು.

Bestower of wisdom and ecstacy to wise.

75. नाराणाम्= ज्ञानिनां, अयः=शुभप्रापकादृष्टं, णः, बलं, यस्मात् सः इति वा = नारायणः॥

ಜ್ಞಾನಿಗಳಿಗೆ ಶುಭಾವಹವಾದ ಅದೃಷ್ಟವನ್ನು ಹಾಗೂ ಬಲವನ್ನು ನೀಡುವವನು.

Bestower of vigor and invisible noble merits.

76. नाराणां=ज्ञानिनां, 'आ+अयनं' ईश्वराराधनरूपः सन्मार्गः यस्मात् सः इति वा नारायणः॥

ಜ್ಞಾನಿಗಳಿಗೆ ತನ್ನ ಆರಾಧನಾರೂಪವಾದ ಸನ್ಮಾರ್ಗವನ್ನು ತೋರುವವನು.

One who bestows the noble path of devotion to wise.

77.नाराणाम्= ज्ञानिनां, अयः=फलं=ज्ञानोत्तरकृतपुण्यजनितं, 'णः'= शुद्धिः= ज्ञानोत्तरकृतपापफलाशुचित्वाद्यभावः यस्मात् सः इति वा = नारायणः।

ಅಪರೋಕ್ಷಜ್ಞಾನಿಗಳಿಗೆ ಶುಭಪುಣ್ಯದ ಫಲವನ್ನು ಮೋಕ್ಷದಲ್ಲಿ ಅನುಗ್ರಹಿಸುವವನು ಹಾಗು ಅಶುಭಪುಣ್ಯ, ಪಾಪಗಳು ಲೇಪವಾಗದಂತೆ ಅನುಗ್ರಹಿಸುವವನು.

One who bestows fruits of sacred Virtue and turpitude to wise, after liberation. And one who blesses by unsmearing the effects of ominous virtues and turpitude.

78. नाराणां ज्ञानिनां, अयः= गतिः प्रवृत्त्यादिरूपा, 'णः' बन्धः संसारः यस्मात् इति वा नारायणः॥

ಜ್ಞಾನಿಗಳ ಪ್ರವೃತ್ತಿ ಹಾಗು ಸಂಸಾರ ಬಂಧನಕ್ಕೆ ಕಾರಣೀಭೂತನು.

One who indulges wise and binds them with transmigration (cycle of worldly existence).

79. नाराः = ज्ञानिनः, तान् यं समाधिं, समप्रज्ञातं असम्प्रज्ञातं वा नयतीति वा= नारायणः। 'युज समाधौ' इत्यतः भावे डः, टिलोपश्च॥

ಜ್ಞಾನಿಗಳಿಗೆ ಸಮಾಧಿಯ ಅವಸ್ಥೆಯನ್ನು ತಂದು ಕೊಡುವವನು.

One who bestows tranced and profound Meditation state to wise.

80. रः= सुखम्, आरः= सम्यक् सुखम्, दुःखासम्भिन्नं सुखम्, न विद्यते आरः येषां ते नाराः, दुःखमिश्रितसुखवन्तः=नित्यसंसारिणः इति यावत्। तेषां यं मिश्रितं संशयरूपं अनं=ज्ञानं यस्मात् सः इति वा=नारायणः। 'यु मिश्रण' इत्यतः कर्मणि क्विप् अन गतौ' इत्यतः भावे कः नित्यसंसारिणां मिश्रज्ञानप्रद इति यावत्॥

ನಿತ್ಯ ಸಂಸಾರಿಗಳಿಗೆ ಸಂಶಯ ಮಿಶ್ರಿತವಾದ ಜ್ಞಾನವನ್ನು ನೀಡುವವನು.

One who gives perverted doubtful mixed wisdom/perception to eternal trans-migrants.

81. नाराः = नित्यसंसारिणः, तान् यं मिश्रिणं सुखदुःखमिश्रत्वं नयतीति वा=नारायणः। 'यु मिश्रणे' इत्यतो भावे 'डः' टिलोपश्य। णीङ् प्रापण इत्यतः कर्तरि डः टिलोपश्च। प्रापणं चात्रागमनमेव। तथा च नित्यसंसारिणां सुखदुःखमिश्रत्वप्रापक इति यावत्॥

ನಿತ್ಯಸಂಸಾರಿಗಳಿಗೆ ದುಃಖಮಿಶ್ರಿತವಾದ ಸುಖವನ್ನು ನೀಡುವವನು.

One who dispenses sorrow coupled pleasure to eternal-transmigrants.

82.उक्तरीत्या नाराः= नित्यसंसारिणः, त एवायनं यस्य सः, प्रेरकत्वेन तदन्तःस्थ इति वा नारायणः॥

ನಿತ್ಯಸಂಸಾರಿಗಳಲ್ಲಿ ಪ್ರೇರಕನಾಗಿ ಇರುತ್ತಾ ಅವರನ್ನೇ ತನಗೆ ಆಶ್ರಯವನ್ನಾಗಿ ಮಾಡಿಕೊಂಡವನು.

One who stimuates the eternal trans-migrants and makes them His abode.

83. रः ज्ञानं, अरः=सम्यक् ज्ञानं। न विद्यते अरः येषां ते नाराः केवलायथार्थज्ञानिनः त एव प्राप्ततमस्काः तेषामयः गतिः णः=सुखं यस्मात्

सः इति वा नारायणः। 'अय गतौ' इत्यतः घञर्थे क इति कर्मणि कः प्राप्ततमस्कानां सुखनिरासक इति यावत्॥

ತಾಮಸ ಜೀವಗಳಿಗೆ ಸುಖವನ್ನು ದೂರ ಮಾಡುವವನು.

One who keeps the pleasure far from lethargic/evil people.

84. नाराः= प्राप्ततमस्काः तान् यं= जुगुप्सां केवलं दूःखरूपं तमः नयतीति वा= नारायणः। 'यु जुगुप्सायां'इत्यतः भावे डः टिलोपश्च। णीञ् प्रापण इत्यर्थः कर्तरि डः टिलोपश्च। प्रापणं=आगमनमेव। तथा च प्राप्ततमस्कानां केवलदुःखप्रापकः इति यावत्॥

ತಮಸ್ಸನ್ನು ಹೊಂದಿದವರಿಗೆ ಕೇವಲ ದುಃಖದಾಯಕನು.

Bestower of sheer sorrow to banished souls

85. उक्तरीत्या नाराः= प्राप्ततमस्काः, त एवानयं यस्य सः प्रेरकत्वेन तदन्तःस्थः इति वा= नारायणः। 'तत्रापि च तद्व्यापारादविरोधः' इति सूत्रात्॥

ತಾಮಸ ಜೀವಿಗಳಲ್ಲಿಯೂ ಪ್ರೇರಕರಾಗಿ ಇರುತ್ತಾ ಅವರನ್ನೇ ಆಶ್ರಯರನ್ನಾಗಿ ಮಾಡಿಕೊಂಡವನು.

One who resides in and stimulate the banished souls.

86. नारायणं प्राप्ततमस्कानां अयनं हरिगुरुद्वेदिरूपं दुर्मार्गो यस्मात् सः इति वा नारायणः॥

One who resides in and paves only evil path to banishable souls.

ತಮಸ್ಸನ್ನು ಹೊಂದುವವರಿಗೆ (ಹೊಂದಿದವರಿಗೂ) ಹರಿ-ಗುರುದ್ವೇಷರೂಪ ದುರ್ಮಾರ್ಗವನ್ನು ತೋರುವವನು.

87. अरस्तन्नामकः समुद्रः तस्य अयनं = आश्रयः लोकः यस्य सः=अरायणः। ना=परमपुरुषश्चासौ अरायणश्चेति वा= नारायणः। 'अरश्च ह वै ण्यश्च अर्णवौ ब्रह्मलोक' इति श्रुतेः॥

ಪರಮಪುರುಷನು ಹಾಗೂ 'ಅರ' ಎಂಬ ಹೆಸರಿನ ಸಮುದ್ರವಿರುವ ಬ್ರಹ್ಮಲೋಕಕ್ಕೂ ಸ್ವಾಮಿಯು.

Super-soul and the lord of Brahmalok which has Ocean called "ARA",

88. अरः=समुद्रः स एवायनं यस्य सः= अरायणः। नाचासौ अरायणश्च इति वा= नारायणः। 'यमन्तः समुद्रे कवयोऽवयन्ति' इति श्रुतेः॥

ಸರ್ವೋತ್ತಮನು ಹಾಗು 'ಅರ' ಸಮುದ್ರವೇ ಆಶ್ರಯವಾಗಿ ಉಳ್ಳವನು.

Having the ocean ARA as his abode, He is the noblest.

89. अरः समुद्रः तस्य आश्रयः= अरायणः। ना चासौ अरायणश्चेति वा = नारायणः॥

ಸರ್ವೋತ್ತಮನು ಹಾಗೂ'ಅರ' ಸಮುದ್ರಕ್ಕೆ ಆಶ್ರಯನು.

By being the abode of Ocean ARA, he is the noblest.

90. नाराः उक्तरीत्या नित्यानित्याश्चेतनाचेतनाश्च तेषां सर्वेषां यं= सर्जनं नयतीति वा= नारायणः। 'यु सर्जन' इत्यतः भावे डः टिलोपश्च। सर्वसृष्टिकर्तेति यावत्॥

ಸಕಲ ಪದಾರ್ಥಗಳ ಸೃಷ್ಟಿಕರ್ತಾ।

Creator of all objects.

91. अयः गतिः तदभावः अयः, स्थितिरिति यावत्। 'ष्ठा गतिनिवृतौ' इत्यतः गत्यभावस्यैव स्थितित्वात्। तथा च उक्तरीत्या नाराणां सर्वेषां आयः=स्थितिः तां नयतीति वा= नारायणः। सर्वस्थितिकर्तेति यावत्॥

ಸಕಲ ಪದಾರ್ಥಗಳ ಸ್ಥಿತಿಕರ್ತಾ।

Conductor of all objects.

92. वेद्यो विष्णुर्महेशानः न कर्मस्वनिकृज्जयोः अकारः कथितः इत्यताक्षरवचनात् अः=रुद्रः, 'यसु प्रयत्नः इत्यर्थः कर्तरि डप्रत्यये टिलोपे णः लयकर्ता अदर्शनस्येव लयत्वात्। तथा च रुद्र द्वारा सर्वलयकर्तेति वा = नारायणः॥

ರುದ್ರದ್ವಾರಾ ಸಕಲಪದಾರ್ಥಗಳ ಲಯಕರ್ತನು.

Destructer of all objects through Rudra.

93. नरान् सर्वान् आ सम्यक् एनं वायुं प्रेरयतीति णः। यो वायुरितिशब्दित (एकाक्षरकोशः अभिधानसङ्ग्रहः) इत्यभिधानात्। 'णुद प्रेरण' इत्यर्तः कर्तरि डः टिलोपश्च। तथा च वायुद्वारा सर्वप्रेरक इति वा= नारायणः। प्रेरणमेव च नियमनं। नियमनं व्यापारेषु प्रेरणं इति टीकोक्तेः॥

ಎಲ್ಲಾ ಪದಾರ್ಥಗಳನ್ನೂ ವಾಯುದೇವರ ಮೂಲಕ ಪ್ರೇರಿಸುವವನು ಅಥವಾ ನಿಯಮಿಸುವವನು.

| |
|---|
| Inciter and regulater of everything through Devine Vayu. |
| 94. नारान् उक्तरीत्या चेतनान् आ सम्यक् जुगुप्सयति=अज्ञान् करोति इति। यः, 'यु जुगुप्सायां कर्तरि जृ प्रत्यये टिलोपे यः। णः=बन्धकः 'णह बन्धने' इत्यतः कर्तरि डः। तथा च चेतनानां सम्यक् अज्ञान बन्धकर्तेति वा= नारायणः ॥ |
| ಚೇತನರಿಗೆ ಅಜ್ಞಾನವನ್ನು ಸಂಸಾರ ಬಂಧನವನ್ನು ನೀಡುವವನು. |
| Bestower of ignorance and confinement to sentients. |
| 95. नाराणां= मुक्तियोग्यचेतनानां आ= सम्यक् यः ज्ञापकः। णः = मोचकः 'या प्रापणे' प्रापणं=ज्ञानं इत्यतः गोदइत्यादिवत् कर्तरि कप्रत्यये 'अतो लोक इटि च' इत्याकारलोपे (पा.सूत्र 6-4-24) यः= ज्ञापकः। 'णिजि शुद्धौ इत्यतः कर्तरि डप्रत्यये टिलोपे णः= मोचकः ज्ञानानन्दस्वरूपाविर्भावकस्येव मोचकत्वात्। तथा च योग्यचेतनानां ज्ञानमिश्रदात इति नारायणः। यद्वा 'या प्रापणे' इत्यतः भावे कप्रत्यये अकारलोपे यः ज्ञानं सुखरूपमोक्षः यस्मात् सः इति ज्ञानसुखरूप मोक्षदातृत्वात् नारायणः॥ |
| ಯೋಗ್ಯ ಚೇತನರಿಗೆ ಜ್ಞಾನವನ್ನೂ ಹಾಗೂ ಮೋಕ್ಷವನ್ನೂ ನೀಡುವವನು. |
| Bestower of wisdom and liberation to Worthy Sentients. |
| 96. अथवा नाराणां आ=सम्यक् येन=वायुना 'णीञ् प्रापणे' प्रापणं=ज्ञानं इत्यतः भावे डप्रत्यये टिलोपे णः=ईनं णश्च निवृत्तिवाचक इति यावत्। मोक्षो वा यस्मात् सः इति वा= नारायणः। 'विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञया' इति वचनात्॥ |
| ಯೋಗ್ಯ ಚೇತನರಿಗೆ ವಾಯುದೇವರ ಮೂಲಕ ಜ್ಞಾನಾನಂದಾವಿರ್ಭಾವರೂಪ ಮೋಕ್ಷವನ್ನು ಕರುಣಿಸುವವನು. |
| One who manifests the bliss and wisdom of worthy sentients by emancipation through Vayu, |
| 97. उक्तरीत्या नाराः=लक्ष्मी तया आ सम्यक् बलमिश्रितः आयणः सुखरूपश्चेति वा नारायणः। लक्ष्मी वामभागे नारायणो दक्षभाग इति लक्ष्म्या सह अर्धनारीनरात्मकरूपः॥ |

ಲಕ್ಷ್ಮಿಯು ಎಡಭಾಗದಲ್ಲಿ ನಾರಾಯಣನು ಬಲಭಾಗದಲ್ಲಿ ಎಂಬ ಅರ್ಧನಾರೀನರಾತ್ಮಕರೂಪನಾಗಿದ್ದಾನೆ.

"the lord who is half female (and half male)", taking the form of Lakshmi in the left and Narayana in the right

98. उक्तरीति नारः वायुः तेन आ सम्यक् मिश्रितः आयणरूपश्चेति वा नारायणः। सः वामभागे वायुर्दक्षभागे इति वायुना सह मिश्रितैकरूपः॥

ಎಡಭಾಗದಲ್ಲಿ ನಾರಾಯಣನು, ಬಲಭಾಗದಲ್ಲಿ ವಾಯುದೇವನು ಎಂಬುದಾಗಿ ಭಕ್ತರೊಂದಿಗೆ ಒಂದಾದ ರೂಪವುಳ್ಳವನು.

One who manifests unitedly as Narayana in the right and Vayu in the left part of the devotee's body.

99. प्रेरकत्वेन नरसम्बन्धित्वात् नाराः देवाः। सर्वदेवैः मिलतैकरूपप्रदः नारायणः॥

ಎಲ್ಲಾ ದೇವತೆಗಳೊಂದಿಗೆ ಮಿಲಿತವಾದ ರೂಪವುಳ್ಳವನು.

One who has composite form along with all Deities.

100. उक्तरीत्या नारो वायुः पदैक्यात् तेन चतुर्मुखो ग्राह्यः। अः रुद्रः तयोर्यं मिश्रणं नयतीति वा नारायणः। तत्र चतुर्मुखो दक्षभागे रुद्रो वामभाग इति तयोरेतादृशैकरूपप्रदः। वं च त्रिपञ्चविधमिलितसद्भावे बहुग्रन्थान्तरे निरूपणं इति ऐतरेयभाष्यं मानम्॥

ಬಲಭಾಗದಲ್ಲಿ ಚತುರ್ಮುಖನು, ಎಡಭಾಗದಲ್ಲಿ ರುದ್ರನು ಇವರಿಂದ ಮಿಲಿತವಾದ ರೂಪವುಳ್ಳವನು.

One who has Brahma in the right and Rudra in the left, in his composite form.

102. न विद्यन्ते अराः पारतन्त्र्यादिसर्वदोषाः यस्यासौ नारो भगवान् स्वयं स्वेन अस्य रुद्रस्य यं मिश्रणं नयतीति वा नारायणः। तत्र स्वयं वामभागे रुद्रो दक्षभागे एतादृशरूपप्रदः॥

ತಾನು ಎಡಭಾಗದಲ್ಲಿ ಇರುತ್ತಾ ಬಲಭಾಗದಲ್ಲಿ ರುದ್ರನೊಂದಿಗೆ ಮಿಲಿತವಾದ ರೂಪವುಳ್ಳವನು.

One who resides in the left and has mingled form on the Right, with Rudra.

103. उक्तरीत्या नाराः= मुक्ताः सर्वेदेवाः सस्त्रीकाः तेषां आ सम्यक् यं मिश्रणं अर्धनारीनरत्वरूपं नयतीति वा नारायणः। तत्र स्त्रियो वामभागे पुरुषो दक्षभागे एतादृशरूपप्रदः॥

ಮುಕ್ತ ದೇವತೆಗಳಿಗೆ ಅರ್ಧನಾರೀನರತ್ವರೂಪವನ್ನು ಅನುಗ್ರಹಿಸುವವನು.

One who bestows Masculine-mixed-Feminine form to liberated deities.

104. अह कारणं, 'अन्तःपुरे भूषणे च चरणे कारणे रणे। अकारः कथितः' इत्येकाक्षरवचनात् रः देहः प्राकृतो भौतिको वा। 'रश्च कायोऽनिले सूर्ये'इत्येकक्षरवचनात्। अयः शुभप्रापकं दिष्टं। 'अयः शुभावहो विधि'रित्यभिधानात्। णः प्रेरकः 'णुद प्रेरण' इत्यतः कर्ति डः टिलोपश्च। अश्च रश्च अयश्च णश्च अरायणाः न विद्यन्ते अरायणाः यस्य सः इति वा नारायणः॥

ಸರ್ವತಂತ್ರ ಸ್ವತಂತ್ರನೂ, ನಿತ್ಯಮುಕ್ತನೂ ಆದ್ದರಿಂದ ಕಾರಣ, ಪ್ರಾಕೃತ ಅಥವಾ ಭೌತಿಕದೇಹ, ಅದೃಷ್ಟ, ಪ್ರೇರಕರಿಲ್ಲದವನು.

One who is Orignator (Without root/cause), as he is 1. independent in all universally acknowledged principles, 2.emancipated, 3.without physical form, 4.without any invisible inciter.

105. न विद्यते आसवर्गो यस्मात् सः इति ना। 'अकारः सर्वगे भावे परिताप' इत्यकाक्षरवचनात् स्वापेक्षया अधिकपरिमाणशून्य इति यावत्। 'महतो महीयान्' इत्युक्तेः। सः ना रः शरीरं 'रश्च कायोऽनिल' इति वचनात्। अः वेधाः चतुर्मुखः। 'वेधाः विष्णुर्महीशानो कामटेश्वनिकेज्ययोः'। अकारः कथितः' इत्येकाक्षरवचनात्। 'यकारः पुंसि यवने यमेव दातरि यातरि' इति वचनात्। रश्च अश्च यश्च रायाः तेषां नः नियामकः। 'णीञ् प्रापणे' इत्यतः कर्तरि डः। नाश्चासौ रायणश्चेति वा नारायणः॥

ತನಗಿಂತ ಬೇರೆ ಸರ್ವವ್ಯಾಪ್ತರಿಲ್ಲದವನು. ದೇಹ, ಬ್ರಹ್ಮರುದ್ರರಿಗೆ ನಿಯಾಮಕನು.

One who is the sole omnipresent and who is the stimulator of Brahma, Rudra and all organisms.

106. न विद्यते आ परितापो यस्मात् सः। 'ना अकारः सर्वग' इति पूर्वोक्तवचनात्। रः सूर्यः अः= ईशानः, यो=वायुः, रश्च अश्चयश्च=रायाः, तेषां नः नियामकः। नाश्चासौ राणश्चेति नारायणः। पक्षद्वयेपि 'भीषास्माद्वातः पवत' इति श्रुतिः प्रमाणं॥

ಪರಿತಾಪವಿಲ್ಲದ್ವನು, ಹಾಗೂ ಸೂರ್ಯ-ರುದ್ರ-ವಾಯುಗಳಿಗೆ ನಿಯಾಮಕನು.

One who has no agony and who reigns Surya, Rudra and Vayu.

107. न विद्यते अरः शीघ्रगामी यस्मात् नारः। 'अरः शीघ्रे च चङ्क्राङ्गे शीघ्रगामिनी' इत्यभिधानात्। 'आसीनो दूरं व्रजति' इति वचनात्। आसम्यक् यः दाता नस्य सुखस्येति आयणः' यकारः पुंसि यवन' इति पूर्वोक्त वचनात्। नयः क्कव्ये यण इति वचनं राजदन्तादिषु परं' इति (पा.सू.2-239. साधु)। नारश्चासौ अयणश्चेति नारायणः॥

ಅತಿಶಯವೇಗದಿಂದ ನಡೆಯುವವನು ಹಾಗೂ ಚೆನ್ನಾಗಿ ಸುಖವನ್ನು ನೀಡುವವನು.

One who is super-sonic and who is the apt bestower of pleasures.

108. न विद्यते औ चरणौ यस्यासौ ना। 'अः अन्तःपुरे भूषणे चरणे कारणे रणे। इति पूर्वोक्त वचनात्। अरः शीघ्रगामी ना चासावरश्चेति नारः। 'अपाणिपादो जवनो ग्रहीता' इति वचनात्। अः स्वल्पार्थः अः स्यादभावे स्वल्पार्थ, इति विश्वः तस्य याः दातारः। 'यकार पुंसि' इत्यादि वचनात्, तेषां नः नियामकः नारश्चासौ अणश्चेति नारायणः। भगवदन्येषु अपेक्षितसर्वदातृत्वं नास्तेव। अल्पदातृत्वमपि ईश्वराधीनमित्युक्तं भवति॥

ಕಾಲುಗಳಿಲ್ಲದೇ ಶೀಘ್ರವಾಗಿ ಹೋಗುವವನು. ಅಲ್ಪದಾತೃಗಳನ್ನೂ ನಿಯಮಿಸುವವನು.

One who speeds without legs and the bestower of everything to even small bestowers.

109. न स्वातन्त्र्यादिकं। 'नकारः स्वगते वृक्ष' इति वचनात् आराति सम्यक् अददाति इति नारः। आ सम्यक्य यस्य दातुः भक्तिपूर्वकं अविरादिदातुर्यजमानस्य णः=सुखं यस्मात् सः इति अयणः। नारश्चासौ अयणश्चेति नारायणः। आङ् पूर्वात् रा दाने इत्यतः पचाद्यच् प्रत्यये तस्य आर्दधानुकत्वेन 'अतो लोप इटिच' इति आकारलोपे अरः सम्यक् आदात्। यकारः पुंसि इति उक्तत्वात् यकारो धातृवचनः योग्यतया हविरादेः सम्बन्धः। तथा च यजमानदत्तहरविरादिकं आदाय तस्य सुखदात इत्युक्तं भवति। 'रातेर्दातुपरायणमि'इत्युक्तेः॥

ತಾನು ಸ್ವತಂತ್ರನು ನಿರಪೇಕ್ಷನೂ ಆಗಿದ್ದರೂ, ಯಜಮಾನನು ಭಕ್ತಿಪೂರ್ವಕವಾಗಿ ಕೊಡುವ ಹವಿಸ್ಸನ್ನು ಸ್ವೀಕರಿಸಿ ಅವನಿಗೆ ಸುಖವನ್ನು ನೀಡುವವನು.

Being independent, one who acknowledge the oblation given by the devotees, by bestowing pleasures on them, despite being desireless.

110. नरस्य स्वागतस्य अतिथिरूपेण स्वात्मानं प्राप्तस्य आ सम्यक् सम्पूर्णं राः 'रा द्रविणं धनं' इति धनञ्जयः। तस्य यः दाता णः तेन तुत्यश्चेति वा नारायणः॥

ಅತಿಥಿ ಸತ್ಕಾರವನ್ನು ಉತ್ತಮ ರೀತಿ ಮಾಡುವವನಿಗೆ ಅದಕ್ಕೆ ಅನುಗುಣವಾಗಿ ಸುಖವನ್ನು ನೀಡುವವನು.

One who bestows apt pleasure to those who aptly treats the guest.

111. नाराः= आपः तत्र अयः=कतिः णः सुखं यस्य सः इति वा नारायणः मत्स्यरूपी नारायणः। 'मत्स्यकरूपकलयोदविहारिन्' इति वचनात्। एवमेव कूर्मरूपो वा नारायणः। 'कूर्मस्वरूपकमन्दरधारिन्' इति वचनात्॥

ನೀರಿನಲ್ಲಿ ಸಂಚರಿಸುವ ಹಾಗೂ ಅಲ್ಲಿಯೇ ಸುಖಿಸುವ ಮತ್ಸ್ಯರೂಪಿಯು ಹಾಗು ಕೂರ್ಮರೂಪಿಯೂ.

One who blissful even when he manifests the form of Fish and amphibious tortoise.

112. पूर्ववत् नारः शेषः कूर्मरूपो वायुः अयःताभ्यां णःस्तुत्यः कूर्मरूपः।'णुस्तुतौ' कर्मणि डः। 'वाधाः विष्णुर्महीशानो' इति पूर्वोक्तवचनात्। अकारः (उभयत्र वाचकः) तथा च शेषकूर्मरूप-वायुभ्यां स्तुत्यः स यः कूर्मरूपश्चेति वा नारायणः॥

ಈ ಭೂಮಿಯನ್ನು ಹೊತ್ತಿರುವ ಶೇಷದೇವ ಹಾಗೂ ಕೂರ್ಮರೂಪಿಯಾದ ವಾಯುದೇವರಿಂದ ಸ್ತುತ್ಯನಾದ ಕೂರ್ಮರೂಪ ಭಗವಂತನು.

Lord who manifests as Kurma, the form which is praised by the bearers of Earth i.e. Shesha and Vayu.

113. 'णश्च अदर्शने' इत्यतः कर्मणि डः अः स्त्रियां टाप् आ इति रूपं इति विवेक्तव्यं। आ अदर्शनं प्राप्ता, गर्भोदके निमज्जितेति यावत्। 'रा=भमिः रा=भवु ख्यातावित्येकाक्षरवचनात्। आ चसा राच अश्चराः णीताः अश्चराः येन सः नारः हिरण्याक्षः। तस्य यः सम्प्रहारकः (धा.सं 1249) 'युध् समप्रहारे' कर्तरि डः 'नश अदर्शने' अदर्शन प्रापकः संहारकः इति वाय्त। णशेः कर्तरि डः तथा च गर्भोदके भूमिं निमज्जयन्तं हिरण्याक्ष्यं करणताडनेन संहृतवान् वराहरूप इति वा नारायणः। 'सूकररूपकदानवशत्रो भूमिविधारक' इत्युक्तेः॥

ಗರ್ಭೋದಗದಲ್ಲಿ ಭೂಮಿಯನ್ನು ಮುಳುಗಿಸಿದಿ ಹಿರಣ್ಯಾಕ್ಷನನ್ನು ಕಿವಿಗೆ ಹೊಡೆದು ಸಂಹರಿಸಿದ ವರಾಹರೂಪಿಯು.

One who manifested in the Ocean as Varaha and punched blow at the ears of Hiranyaaksha to kill him.

114. केसरिणः सिंहस्य आकारः कैसरः नरस्य आकारः कैसरश्च नारश्चनारौ। विरूपाणामपि समानार्थानां वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डौ (वार्तिकं 241.सिकौ.गुटक)। 'विरूपाणामपि एक शेषो वक्तव्य' इति वार्तिकात्। अत एव 'मनो बुद्धी तु द्वादशे' ति प्रयोगः, तावस्य त इति नारो नरसिंहः। अर्श आद्यजन्तो अयं। तेन रूपेण यं मिश्रितं सदसज्जीरूपं हिरण्यकशिपुं। णः चुम्बति सौष्ठपुटाभ्यां शोणितपानं करोतीति णः। 'णिसि' (धातु.1097) चुम्बन इति कर्तरि डः। नरसिंहरूपो हिरण्यकश्यपु संहर्ता इति नारायणः। 'देवनृसिंहकहिरण्यकशत्रो' इत्युक्तेः।

ನರಸಿಂಹನಾಗಿ ಹಿರಣ್ಯಕಶಿಪುವನ್ನು ಸಂಹರಿಸಿದವನು.

One who manifested as Narasimha and killed Hiranya Kashipu.

115. अः अन्तःपुरं रा=भूमिः द्रव्यं वा अः= भूषणानि। अश्चराच्च अश्च= अराः नीताः अपहृताः अराः येन सः नारो बलिः तस्मात् अयःदानात् णः स्तुत्यश्चेति वा वामनत्रिविक्रमरूपो नारायणः। 'वसुस्पार्हमुत जेतोत दाता' इति श्रुतेः॥

ಬಲಿಯಿಂದ ಭೂಮಿಯನ್ನು ದಾನವಾಗಿ ಪಡೆದು ಸ್ತುತ್ಯನಾದ ವಾಮನನು ಹಾಗೂ ತ್ರಿವಿಕ್ರಮನು.

One who took earth as alms from Bali and was praised as Vamana and Trivikrama.

116. 'राजृ दीप्तौ' इत्यतः भावे डप्रत्यये टिलोपे रः दीप्तिः तदभावः अरः, तदभावो नारः अत्युत्कृष्टदीप्तिः। 'द्वौ नञौ' इति न्यायात्, तस्याः अयनं आश्रयः अत्युत्कृष्टदीप्तिरुक्तः परशुरामरूपो वा नारायणः॥

ಅತ್ಯುತ್ಕೃಷ್ಟದೀಪ್ತಿಮಂತನಾದ ಪರಶುರಾಮನು.

One who is excelling in radiance.

117. अरं दीर्घे च चङ्क्राङ्गे इत्युक्तेः अराणि शीघ्रगामिनी (गामिन्यः यः)यावानि रथाः येषां ते अरायाः क्षत्रियाः, रथित्वस्य क्षत्रयलिङ्गत्वात्,

सूत्रकारेण पौत्रायणस्य रथित्वलिङ्गेन क्षत्रियत्वस्य साधितत्वात्। तेषां णः अदर्शन प्रापकः संहारक इति यावत्। ना परमपुरुषश्चासौ अरायणश्चेति सकलक्षत्रिय संहारकः परशुराम इति वा नारायणः। 'रामभृगूद्वह सूर्जितदीप्ते क्षत्रकुलान्तक' इत्युक्तेः॥

ಸರ್ವೋತ್ತಮನೂ ಕ್ಷತ್ರಿಯಕುಲಸಂಹಾರಕನೂ ಆದ ಪರಶುರಾಮನು.

Parashuram who is the Best and annihilater of Kshatriya (Warrior) dynasty.

118. नरस्य दशरथस्य अपत्यं नारः रामः तस्मात् अ परितापो यस्यासौ नाराः। सचासौ यश्य सुरारिस्वरूपो रावणादिः एवं च नारो रावणादिः नारो यः तं बन्धयतीति वा रामरूपो वा नारायणः। 'राघव राघवराक्षसशत्रो'इति वचनात्॥

ಮನುಷ್ಯನಾದ ದಶರಥನ ಮಗನಾಗಿ ದೇವತೆಗಳ ಶತ್ರುವಾದ ರಾವಣನಿಗೆ ಪರಿತಾಪವನ್ನು ನೀಡಿ ಸಂಹರಿಸಿದ ರಾಮನಾದ್ದರಿಂದಲೂ ನಾರಾಯಣನು.

One who took birth in mortal Dasharat as Ram and who agonized Ravan, the foe of deities.

119. नारः अर्जुनः तस्य यः यशः रायत इति प्रापयतीति कृष्णरूपो नारायणः। 'यशोयः कथितः प्राज्ञैः (शिष्यैः)' इत्यभिधानात्॥

ಅರ್ಜುನನಿಗೆ ಕೀರ್ತಿಯನ್ನು ತಂದುಕೊಟ್ಟು ಕೃಷ್ಣನಾದ್ದರಿಂದಲೂ ನಾರಾಯಣನು.

Narayan who incaranated as Krishna to earn fame for Arjun.

120. नारः अर्जुनः, अः=चतुर्मुखपदैक्यान्तेन भीमो ग्राह्यः, यो यमः तदवतारो युधिष्ठिरः तेषां णः सुखं यस्मात् स इति वा कृष्णरूपो नारायणः॥

ಅರ್ಜುನನಿಗೆ, ಮುಂದೆ ಚತುರ್ಮುಖನಾಗಲಿರುವ ಭೀಮನಿಗೆ, ಯಮಾವಾತಾರಿಯಾದ ಯುಧಿಷ್ಠಿರನಿಗೆ ಸುಖವನ್ನು ತಂದುಕೊಟ್ಟ ಕೃಷ್ಣರೂಪಿಯಾದ್ದರಿಂದಲೂ ನಾರಾಯಣನು.

Narayan who incaranated as Krishna to bestow pleasure to Arjun, Bheema the Brahma Designate, and Yudhister the incaranation of Yama.

121. नारः अर्जुनः, तस्य आसम्यक् यं यानं रथं नयतीति, अर्जुनसारथ्ये कृष्णरूप इति वा नारायणः। 'यानि यातरि यस्त्यागे' इत्येकाक्षरोक्तेः। 'पाण्डवबन्धो इन्द्रसुतावक' इति वचनात्॥

ಅರ್ಜುನ ಸಾರಥಿಯಾಗಿ, ರಥವನ್ನು ನಡೆಸಿದ ಕೃಷ್ಣರೂಪನಾದ್ದರಿಂದಲೂ ನಾರಾಯಣನು.

Narayan who incaranated as Krishna to become Charioteer of Arjun.

122. प्रेरकत्वेन नरसम्बन्धित्वात् नाराः दैत्याः, तेषु तद्विषये अयः गतः ण शुद्धिः आप्तिरूपा यस्य, दैत्यविप्रलम्भे बुद्धरूपः इति वा नारायणः। 'दैत्यविमोहकनित्यसुखादेः' इत्युक्तेः॥

ದೈತ್ಯರಿಗೆ ಮೋಹವನ್ನು ಉಂಟುಮಾಡಿದ ಬುದ್ಧರೂಪನಾದ್ದರಿಂದಲೂ ನಾರಾಯಣನು.

Narayan who manifested as Buddha to delude Daitya-Demons.

123. नः= स्वागतः, अरं=शीघ्रं, अः=रमणं, तस्मिन्न तस्मिन्न या हर्ता रति वा नारायणः। 'दुष्टकुलान्तककल्किस्वरूप' इति वचनात्॥

ಸ್ವತಂತ್ರನಾಗಿ ಶೀಘ್ರಗಾಮಿಯಾದ ಕಲ್ಕಿರೂಪನಾದ್ದರಿಂದಲೂ ನಾರಾಯಣನು.

Narayan who manifested as Self-reliant supersonic Kalki.

124. पूरवोक्तरीत्या नाराः=वेदाः तान् अस्य चतुर्मुखस्य यः दाता णः तेन स्तुत्यश्चेति हयग्रीवरूपो वा नारायणः।

ವೇದಗಳನ್ನು ಚತುರ್ಮುಖನಿಗೆ ನೀಡಿ, ಅವನಿಂದ ಸ್ತುತ್ಯನಾದ ಹಯಗ್ರೀವರೂಪಿಯಾದ್ದರಿಂದಲೂ ನಾರಾಯಣನು.

Narayan who manifested as Hayagreeva and the one who was praised by Chaturmukh for initiating Vedas(Shruti) onto him.

125. नारान् वेदान् आसम्यक् यान् मिश्रितान् अपपाठादिसंयुतान्, शोधयति सम्यक् करोतीति णः॥

ಅಪಪಾಠಾದಿಗಳಿಂದ ಮಿಶ್ರಿತವಾದ ವೇದಗಳನ್ನು ಪರಿಶುದ್ಧಗೊಳಿಸಿದ ವೇದವ್ಯಾಸರೂಪಿಯಾದ್ದರಿಂದಲೂ ನಾರಾಯಣನು.

Vedavyas who sanctified the mis-read and adulterated Vedas is Narayan.

॥ಶ್ರೀ ಕೃಷ್ಣಾರ್ಪಣಮಸ್ತು॥